**कौसल** पु० ब०व०। कुस—अलच्। देशभेदे। तेऽभिजनोऽस्य तेषां राजा वा ष्यञ्। कौसल्य पित्रादिक्रमेण तद्देशवासिनि बहुषु तस्य लुक् कोसलाः। कोशलशब्दे विवृतिः। कोसलदेशस्य द्विविधः पूर्वोत्तरभेदात् "कोसलाधिपतिं चैव तथा वेणातटाधिपम्। कान्तारकांश्च समरे तथा प्राक्कोसलान्नृपान्" भा० स० ३०अ० "दक्षिणाये च पाञ्चालाः पूर्व्वाः कुन्तिषु कोसलाः" १३अ० उत्तरकोसलास्तु कोशलशब्दे दर्शिताः

**कौहल** पु० कौ हलति स्पर्द्धते अच् पृषो०। १वाद्यभेदे मेदि० २मद्यभेदे च हेम० ३नाटकशास्त्रकर्त्तृमुनिभेदे तस्यापत्यम् शिवा० अण्। कौहल तदपत्ये पुंस्त्री० डलयोरैक्यात् कौहडोऽप्यत्र

**कौहनीय** पु० ऋषिभेदे "उपयातायाचार्य्यमिति कौहनीयाः" गोभि० गृ०सू०। उपयातायाचार्य्यं समीपं गतायार्घ्यं देयमिति कौहनीया आचार्य्या आहुः" संस्त०रघुनन्दनः

**कौहित** पु०। ऋषिभेदे। ततोऽपत्ये शिवा० अण्। कौहित तदपत्ये पुंस्त्री०

**कौकिली** स्त्री कोकिलेन दृष्टा अण्। कोकिलर्षिदृष्टायां सौत्रामण्याम्। "द्वे सौत्रामण्यौ कौकिली चरकसौत्रामणी च" लाट्या० श्रौ०सू०।

**कौकुट्टक** पु० ब०व०। देशभेदे स च दक्षिणस्थः। "अथापरे जनपदा दक्षिणा भरतर्षभ!" इत्युपक्रमे "कौकुट्टकास्तथा चोलाः कौङ्कणाः मालवानराः" भा० भी० ९अ०।

**कौकुरुत्सक** पु० ब०व०। जनपदभेदे।

**कौकुर** पु० ब०व०। कुकुराणां देशः अण्। १देशभेदे। "अम्बष्ठाः कौकुरास्ताक्ष्याः वस्त्रपाः पह्लवैः सह" भा० सभा० ५१अ०। कुकुराः यादवभेदाएव स्वार्थे अण्। कुकुरवंश्ये २नृपभेदे। "श्रुत्वा विनष्टान् वार्ष्णेयान् सभोजान्धककौकुरान्" भा० मौ० ५अ०।

**कौकृत्य** न० कुत्सितं कृत्यं स्वार्थे अण्। १अयुक्तकरणे २अनुतापविषये च मेदि०।

**कौक्कुटिक** पु० कुक्कुटीं मायां, पादपतनदेशञ्च पश्यति ठक्। १दाम्भिके,कीटादिवधभीत्या पादक्षेपस्थानमात्रदृष्टरि संन्यासिनि च मेदि०। सन्यासी हि हिंसाभयात् पादन्यासप्रदेशपर्य्यन्तमेव पश्यन् दूरात् चक्षुः संयम्य यातीति तथात्वम्।

**कौक्कुटिकन्दल** पुंस्त्री कुक्कुटस्यायम् इञ् कौक्कुटिः स इव कन्दलः। (वेड़ासाप) सर्पभेदे त्रिका०। स्त्रियां ङीष्।

**कौक्ष** त्रि० कुक्षौ बद्धः असिभिन्नः। कुक्षिबद्धे अलङ्कारादौ

**कौक्षक** त्रि० कुक्षौ देशभेदे भवः धूमा० वुञ्। कुक्षिदेशभवे

**कौक्षेय** त्रि० कुक्षौ भवः"दृतिकुक्षीत्यादिना" पा०ढञ्। कुक्षौ भवे। "असिं कौक्षेयमुद्यम्य चकाराप्रनसं मुखम्" भट्टिः

**कौक्षेयक** पु० कुक्षौ बद्धः असिः ढकञ्। कुक्षिबद्धे खड्गे "कौक्षेयकेण सन्निहितविषधरेणेव चन्दनलता" काद०। "बहुतीक्ष्णकौक्षेयक." दशकुमा०।

**कौङ्क** पु० कोङ्कएव स्वार्थे अण्। कोङ्कणदेशे शब्दरत्ना०

**कौङ्कण** पु० ब० व०। कोङ्कण+स्वार्थे अण्। १कोङ्कणदेशे "कौङ्कणाः मालवानराः" भा०भी० ९अ०। तस्य राजा अण् २तद्देशनृपे च।

**कौङ्किण** न० ब०व०। कोङ्कण+पृषो०। कोङ्कणदेशे शब्दर०।

**कौञ्च** पु० क्रुञ्चएव स्वार्थे अण् पृषो०। क्रौञ्चपर्व्वते त्रिका०।

**कौञ्जायन्य** पु० कुञ्जा० गोत्रापत्ये च्फञ् ततः स्वार्थे ञ्य। १कुञ्जर्षिगोत्रापत्ये स्त्रियान्तु न ञ्य किन्तु गोत्रप्रत्ययान्तत्वात् ङीष् कौञ्जायिनी सा च २ब्राह्मण्याम् जटाधरः।

**कौञ्जि** पुंस्त्री० कुञ्जस्यर्षेरनन्तरापत्यम् अतइञ्। कुञ्जर्षेरनन्तरापत्ये स्त्रियां वा ङीप्।

**कौट** त्रि० कूटे अद्रिशृङ्गे भवः उत्सा० अञ्। १कुटजवृक्षे (कुरची) भावप्र० कुटयां गृहभवः अण्। २स्वतन्त्रे त्रि० कूटस्य भावः अण्। ३मिथ्याकथने ४मिथ्यासाक्ष्ये च

**कौटकिक** त्रि० कूटमेव कूटकं मांसकूटं तत्पण्यमस्य ठञ्। मांसविक्रेतरि शब्दरत्ना०

**कौटज** पु० कुटमेव कौटं तत्र जातः। कुटजवृक्षे रायमुकुटः

**कौटजभारिक** त्रि० कुटजस्य भारं हरति वहत्यावहति वा वंशा०ठञ्। १कुटजभारहारिणि २तद्वाहके ३तदावहके च

**कौटजिक** त्रि० कुटजं भारभूतं हरति वहति आवहति वा ठञ्। भारभूतकुटजस्य १हारके २वाहके ३आवाहके च

**कौटतक्ष** पु० कोटः स्वतन्त्रः तक्षा टच् समा० स्वतन्त्रे तक्षणि

**कौटल्य** न० कुट-कलच् स्वार्थे ष्यञ्। कौटिल्यशब्दार्थे हेमच०

**कौटसाक्ष्य** न० कूटसाक्षिणोभावः कर्म्म वा ष्यञ्। मिथ्यासाक्ष्ये "कौटसाक्ष्यं सुहृद्वधः" मनुना सुरापानसमानकोक्त्या तस्यानुपातकता। कौटसाक्ष्यदण्डस्य मनुना दर्शितो यथा

"यस्मिन् यस्मिन् विवादे तु कौटसाक्ष्यं कृतं भवेत्। तत्तत् कार्य्यं निवर्त्तेत कृतञ्चाप्यकृतं भवेत्। लोभान्मोहाद्भयान्मैत्रात् कामात् क्रोधात्तथैव च। अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते। एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत्। तस्य दण्डविशेषांस्तु प्रवक्ष्याम्य-